कु॰टी॰
१

ॐ श्रीगणेशाय नमः ॐ गुरुभ्यो नमः अमरीकबरीभारभ्रमरीमुखरीकृतं दूरीकरोतु दुरितं गौरीचरणपं
कजं १ परस्परतपःसंपत्फलायितपरस्परौ प्रपंचमातापितरौ प्रांचौ जायापती स्तुमः २ उद्घाट्य योगक
लया हृदयाब्जकोशं धन्यैश्चिरादपि यथारुचि गृह्यमाणः यः प्रस्फुरत्यविरतं परिपूर्णरूपः श्रेयः स मे दिशतु।
शाश्वतिकं मुकुंदः ३ अलंकारेषु बालानामवगाहनसिद्धये ललितः क्रियते तेषां लक्ष्यलक्षणसंग्रहः ४
येषां चंद्रालोके दृश्यंते लक्ष्यलक्षणश्लोकाः प्रायस्त एव तेषामितरेषां त्वभिनवा विरच्यंते ५ उपमा यत्र सादृ
श्यलक्ष्मीरुल्लसति द्वयोः हंसीव कृष्ण ते कीर्तिः स्वर्गंगामवगाहते ६ यत्रोपमानोपमेययोः सादृश्यल।
क्ष्मीः सहृदयहृदयाह्लादकत्वेनोद्भूततया चोल्लसति व्यंग्यमर्यादां विना स्पष्टं प्रकाशते तत्रोपमालंकारः हं।
सीवेत्युदाहरणं इयं च पूर्णोपमेत्युच्यते हंसीकीर्तिः स्वर्गंगावगाहनं इवशब्दः शुभ्रत्वमित्येतेषामुपमानोपमेयसाधा
रणधर्मोपमावाचकानां चतुर्णामप्युपादानात् यथा वा गुणदोषौ बुधो गृह्णन्निंदुक्ष्वेडाविवेश्वरः शिर।
सा श्लाघते पूर्वं परं कंठे नियच्छति अत्र यद्यप्युपमानोपमेययोर्नैकः साधारणधर्मः उपमाने ईश्वरे चंद्रक्ष्वे
डयोर्ग्रहणमुपादानं तयोर्मध्ये पूर्वस्य चंद्रस्य शिरसा श्लाघनं वहनं उत्तरस्य गरस्य कंठे नियमनं स्थापनं उ
पमेये बुधे गुणदोषयोर्ग्रहणं ज्ञानं तयोर्मध्ये पूर्वस्य गुणस्य शिरसा श्लाघनं शिरःकंपेनाभिनंदनं उत्तरस्य १

क्र०२०
१ स्मेरकर्णीरवदानं तात्मकाचारार्थस्याक्रियः इवशब्देन सह लोपात् अत्र धर्मिलोपस्त्वैच्छिकः नयनयोरानंदज।
नकतया करोतीति तदुपादानस्यापि संभवात् कांत्या स्मरवधूयन्तीत्यत्र वाचकोपमेयलोपः अत्र कांत्ये
ति विशेषणसामर्थ्यात्स्वात्मानं कामवधूमिवाचरतीत्यर्थस्य गम्यमानतया स्वात्मन उपमेयस्य सहोपमा
वाचकेनानुपादानात्स्वैच्छिकः स्वात्मानं स्मरवधूयन्तीत्युपमेयोपादानस्यापि संभवात् काकताली
येत्यत्र काकतालशब्दौ वृत्तिविषये काकतालसमवेतक्रियावर्तिनौ तेन काकागमनमिव तालपतन-
२ मिव काकतालं इतीवार्थे समासाद्वृत्तद्विषयादिति त्तापकात्समासः उभयत्रोपमेयं स्वस्वकविक्रमनं
रहसितत्वाद्यवस्थानं तत्तेन स्वस्य तत्वास्य समागमः काकतालसमागमसदृश इति फलति ततः
काकतालमिव काकतालीयं इति द्वितीयस्मिन्निवार्थे समासाच्च तद्विषयादिति सूत्रेण इवे प्रतिकृ
ताविव्यधिकारस्थेन छप्रत्ययः तथा च पतनदलितं यथा तालफलं काकेनोपभुक्तं एवं रहोदर्शनतत्
भिन्नहृदया तन्वी स्वेनोपभुक्तेति तदर्थः ततश्चात्र काकागमनतालपतनसमागमरूपस्य काकत्
तालोपभोगस्य चोपमानस्यानुपादानात् प्रत्ययार्थोपमायामुपमानलोपः समासार्थोपमायां वा
चकोपमानलोपः सर्वोप्ययं लोपः छप्रत्ययविधायकशास्त्रकृतः अविवक्षितत्वं संभवं इति साधारण। १

दोषस्य कोटेनियमनं कंठाङ्कपरिनाचाम्रनुष्ठानमितिभेदात् तथापि वंद्गारयोर्गुणदोषयोश्च विंबप्रति
विंबभावेनाभेदात् उपादानत्वानादीनां शुक्तिनिष्ठायैकशब्दोपादानेनाभेदाच्च वस्तायाश्चसाधारणधर्म
त्वेनेति एवं स्माद्विशेषः वस्तुतो भिन्नयोरपि उपमानोपमेययोर्धर्मयोः परस्परं सादृश्यादभिन्नयोः पृथगुपाद
नेविंबप्रतिविंबभावउपमालंकारिकसमयः वर्ण्योपमानधर्माणामुपमावाचकस्य च एकद्वित्र
पादानैर्भिन्नालुप्तोपमाष्टधा ७ तडिद्गौरीइत्युत्तम्सा कर्पूरंतीत्यचोभिम कोन्यास्मरवभूपत्नीदृष्टा
तन्वीरहोमया ८ यन्नयामेत्वंतत्वलाभोमेपश्चतद्गतेः तदेवत्कांकतालीयमवितर्कितसंभवं ९ ३ त८
पमेयादीनां च तत्वतीमध्ये एकस्य द्वयोस्त्रयाणां वा प्रतिपादकशब्दाभावेन लुप्तोपमेत्युच्यते सा चाष्टधा
यथा वाचकलुप्ता १ धर्मलुप्ता २ धर्मवाचकलुप्ता ३ वाचकोपमेयलुप्ता ४ वाचकोपमानलुप्ता ५ धर्मो सा ३
पमानलुप्ता ६ धर्मोपमानवाचकलुप्ता चेति ७ तत्रोपमानलोपरहितास्तु सारो भेदास्तडिद्गौरीत्यादिश्लोके ८ उपमानलुप्ता ६
न दर्शिताः तद्व्यतो भेदा उत्तरश्लोकेन दर्शिताः तडिद्गौरीत्यत्र वाचकलोपः तडिदिव गौरीत्यर्थे उपमानता।
निक्षमानाच्च वचनेरिति निसमासविधायकशास्त्रकृतः इंदुतल्पास्योत्यत्र धर्मलोपस्तेछिकः न चास्तुकृतः
कौन्या इंदुतल्पास्येत्यपि वक्तुं शक्यत्वात् कर्पूरंतीत्यत्र धर्मवाचकलोपः कर्पूरमिवाचरंतीत्यर्थे विहित

कु॰ टी॰ त्वादिधर्मतिरोधानः इति भेदः उदाहरणद्वयेपि प्रकृतयोरेवोपमानोपमेयत्वकल्पनं तादृशधर्मार्थसमृ
२ द्धेः शारदेन्दुमानससलिलादिनैर्मल्यस्य वर्णनीयत्वात् प्रकृताप्रकृतयोरप्येषा संभवति यथा वा गि
रिरिव गजराजोयं गजराजवदुच्चकैर्विभाति गिरिः निर्झर इव मदधारा मदधारेवास्य निर्झरः स्रवति॰
प्रतीयस्योपमानस्य उपमेयत्वकल्पनं तल्लोचनंसमंपद्मंत्वद्वक्त्रसदृशोविधुः प्रसिद्धोपमानोपमेयत्वस्
प्रातिलोम्यात्प्रतीपं यथा वा यत्त्वन्नेत्रसमानकान्तिसलिलेमग्नंतदिन्दीवरं मेघैरन्तरितः प्रियेतवमुख
3 च्छायानुकारीशशीयेपित्वद्गमनानुसारिगतयस्तेराजहंसा गतास्त्वत्सादृश्यविनोदमात्रमपिमेदैवेनन
क्षम्यते अन्योपमेयलाभेनवर्ण्यस्यानादरश्चतत् अलंगर्वेणतेवक्त्रकान्त्याचन्द्रोपितादृशः अत्युत्कृ
ष्टगुणतयावर्ण्यमानस्यान्यत्रस्वसादृश्यमसहमानस्योपमेयं किंचित्प्रदर्श्यतावतातस्य तिरस्कारो
द्वितीयंप्रतीपंपूर्वस्मादपिविच्छित्तिविशेषशालि यथा गर्वमसंभाव्यमिमंलोचनयुगलेनकिंवह
सिभद्रे सन्तीदृशानिदिशिदिशिसरस्सुननुनीलनलिनानि वर्ण्योपमेयलाभेनतथान्यस्याप्यनादरः कः
क्रौर्यदर्पस्तेमृत्योत्वत्तुल्याः सन्तिहिस्त्रियः अत्युत्कृष्टगुणतयाक्वचिदप्युपमानभावमसहमान
स्यावर्ण्यस्यवर्ण्यमुपमेयंपरिकल्प्यतावतापितस्यतिरस्कारः पूर्वप्रतीयवैपरीत्येनतृतीयंप्रतीपं ३

उ१ धर्मस्योपादाने प्रत्ययार्थोपमायां धर्मोपमानलोपः समासार्थोपमायां धर्मोपमानवाचकलोपः इति
सूत्रमत्र द्रष्टव्यमन्यानि एतेषामुदाहरणान्तराणि विस्तरभियान लिख्यन्ते उपमानोपमेयत्वं यदेकस्य·
एव वस्तुनः इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः ॥ एकस्यैव वस्तुन उपमानोपमेयत्ववर्णनमनन्व
यः वर्ण्यमानमपि स्वस्य स्वेन साधर्म्यं नान्वेतीति व्युत्पत्तेः अनन्वयिनोऽप्यर्थस्य प्रतिपादनं सदृशा·
न्तरव्यवच्छेदेनानुपमेयत्वबोधनाय इन्दुरिन्दुरिव श्रीमानित्युक्ते श्रीमत्त्वे चन्द्रस्यान्यः सदृशोऽस्ति
इति सदृशान्तरव्यवच्छेदो लभ्यते ततश्च स्वेनापि सादृश्यासंभवादनुपमेयत्वे पर्यवसानं यथा वा
गगनं गगनाकारं सागरः सागरोपमः रामरावणयोर्युद्धं रामरावणयोरिव एवमुदाहरणे श्रीम।
त्त्वस्य धर्मस्योपादानमस्ति इह तु गगनादिषु तुल्यादेर्धर्मस्य तत्त्वास्तीति विशेषः पर्यायेण द्वयोस्त
च्चेदुपमेयोपमा मता धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि ॥ द्वयोः पर्यायेण उपमानोपमेयत्वकल्पने
उ३ तृतीयसादृश्यव्यवच्छेदार्थं धर्मार्थयोर्हि कस्यचित्केनचित्सादृश्ये वर्णिते तस्याप्यनेन सादृश्यमर्थसिद्ध
मपि पुनस्तेन वर्णितं मानं तृतीयसादृश्यव्यवच्छेदार्थं फलति खमिव जलं जलमिव खं हंस इव चन्द्रश्चन्द्र
इव हंसः कुमुदाकारास्ताराः ताराकाराणि कुमुदानि एवमुदाहरणे श्रीरिति धर्म उपात्त इह तु निर्मल·

ऊ॰र॰
ध

ध्यते १ विषय्युपमानभूतं पद्मादि विषयस्तूपमेयं वर्णनीयं मुखादि विषयिणो भेदेन ताद्रूप्येणावति
ष्ठपररंजने रूपवत्करणं रूपकं अन्यरूपेण रूपवतः करणात् नच क्वचित्प्रसिद्धविषय्यभेदपर्य
वसितं क्वचिद्भेदे प्रतीयमानएव तदीयधर्मारोपमात्रपर्यवसितं ततश्च रूपकं तावद्द्विविधं अभेद
रूपकं ताद्रूप्यरूपकमिति द्विविधमपि प्रत्येकं त्रिविधं प्रसिद्धविषय्याधिक्यवर्णनेन न्यूनत्ववर्णने
नानुभयोक्त्या चेति रूपकं षड्विधं अयं ह्विरित्यादिसार्द्धश्लोकेनाभेदरूपकानि अस्यामुखेंदुनेत्यादि
सार्द्धश्लोकेन ताद्रूप्यरूपकाणि चाधिकान्यूनत्वानुभयोक्त्युद्देशक्रमप्रातिलोम्येनोदाहरणानि ये
नरराजइति विशेषणेन वर्णनीयराज्ञि प्रसिद्धशिवाभेदरंजनाच्छिवस्य पूर्वावस्थातो वर्णनीयराज
भावावस्थायां न्यूनताधिकानयोरवर्णनाच्चानुभयाभेदरूपकमाद्यं तृतीयलोचनग्रहणेनापूर्वा
वस्थातो न्यूनतादर्शनान्न्यूनाभेदरूपकं द्वितीयं न्यूनत्ववर्णनमपि उभयाभेददार्ढ्यापादकत्वाच्चम
न्मारकारिविषमदृष्टित्वपरित्यागेन जगद्रक्षकत्वोक्त्या शिवस्य पूर्वावस्थातो वर्णनीयराजभावाव।
स्थायामुत्कर्षविभावनादधिकाभेदरूपकं तृतीयं एवमुत्तरत्र ताद्रूप्यरूपकोदाहरणेष्वपि क्रमेणा
नुभयन्यूनाधिकभावा उन्नेयाः अनेनैव क्रमेणोदाहरणांतराणि चंद्रज्योत्स्नाविसदपुलिनैसैकते। ध

4

यथावा अहमेव गुरुः सुदारुणानामिति हालाहल मास्म तात दृप्यः ननु संति भवादृशानि भूयो भुव
नेस्मिन् वचनानि दुर्जनानां ऐनान्यस्योपमाया अनिष्पत्तिवचश्चैतत् सुधापवादे सुधयातिरन्वा
भेकि त्वां गुजं अर्वणि पर्णोपमित्यनिष्पत्तिवचनं एवं भ्यउत्कर्षशालित्वतर्थं प्रतीयं उदाहरणे मया
पनादन्तो ञ्जोपमित्यनिष्पत्तिरुदयादिना यथावा आकर्णयसजातिवचनीयमिदं भुवि शशांकस्त
वञ्जेणापामरैरूपमीयते प्रतीयमुपमानस्यैकेमर्थ्यमपिमन्वते दृष्टं चेद्वदनं तस्याः किंपद्मेन किमिं
दुना उपमेयस्यैवोपमानप्रयोजकपूर्वं दत्वे नोपमानप्रातिलोम्यात् पंचमप्रतीयं यथावा तदोज्ज
सत्वस्य गासः स्थितादिमो हृथेति विनेऽरुतेयदायस तनोतिमानोः परिवेषकैतवात् दाविधिः अं
दुलानां विधोः पि केचिदनयोपमेयोपमाप्रतीपानामुपमाविशेषत्वेन तदंर्भावंमन्यते अन्येतु
पंचमं प्रतीयप्रकारमुपमानातेपरूपत्वादातेपालंकारमाहुः विषयभेदताद्रूप्यांरंजनं विषयस्य य
त् रूपकं तत्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः अयंहि धूर्जटिः साक्षाद्येन दग्धाः पुरः क्षणात् अयमास्ते
विनाशंभुस्तार्तीयीकं विलोचनं ९ शंभुर्विश्वमवत्यद्य स्वीकृत्य समदृष्टितां अस्यामुखेंदुना लब्धे
नेत्रानंदे किमिंदुना १९ साध्वीयमपरा लक्ष्मीरसुधासागरोदिता अयं कलंकिनश्चंद्रान्मुखचंद्रोतिरि

कु॰द॰ परः शीतांशुरित्यनेन वक्त्रेंदोः प्रसिद्धचंद्रात् भेदमाविष्कृत्य प्रसिद्धचंद्रकार्यकारित्वमात्रप्रतिपादनेन
५ त्कर्षापकर्षयोरदर्शनादनुभयताद्रूप्यरूपकं अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः अभाललोचनः
शंभुः भगवान्बादरायणः अत्र ब्रह्मादावपरः इति विशेषणोज्झितापि नाद्यमात्रविवक्षा विभाविता
चतुर्वदनत्वादिवैकल्यं चोक्तमिति न्यूनताद्रूप्यरूपकं इदं विशेषोक्त्युदाहरणमिति वामनमतं यदा
5 ह एकगुणहानौ गुणसाम्यदार्ढ्यं विशेषोक्तिरिति किमसुभिर्ग्लपितैर्जड मन्यसे मयि निमज्जतु भीम
सुतामनः मम किल श्रुतिमाह तदर्थिकां नलमुखेंदुपरां विबुधः स्मरः अत्र दमयंतीकृतचंद्रोपालंभे
प्रसिद्धचंद्रेण निर्णीतकालिकमनःप्रवेशश्रुतितात्पर्यविषयः किं तु नलमुखचंद्र एवेति तत्राधि
काप्रतिपादनादधिकताद्रूप्यरूपकं रूपकस्य सावयवत्वनिरवयवत्वादिभेदप्रपंचनं तु चित्रमीमांसा
छयीभि यां द्रष्टव्यं परिणामः क्रियार्थश्चेद्विषयात्मना प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा २१ यत्रारोप्य
माणं विषयी किंचित्कार्योपयोगित्वेन निबध्यमानः स्वतस्तस्य तदुपयोगित्वासंभवात् प्रकृतात्म
तापन्नमपेक्षते तत्र परिणामालंकारः तत्रोदाहरणं प्रसन्नेनेति अत्राब्जस्य वीक्षणोपयोगित्वं निरुह्य
तेन तद्दृशः मयूरव्यंसकादिसमासेनोत्तरपदार्थप्राधान्यात् न चोपमितसमासाश्रयणेन दृगब्जमिवे॰

श्रियः याः साद स्पृतं चिरत्नरमभूमिशि दूषूनोः कयोश्चित् एकोवक्ति प्रथमनिर्दिष्टकैटभं कंसमन्यस्तु
तैमस्त्वे कथयभवता कोऽहनस्तत्रपूर्वं अत्रसत्वमित्यनेन कंसकैटभयोर्हन्तापोगरुडध्वजः तत्तादात्म्य
वर्णनीयस्यरामः प्रतिपाद्यते प्रतिकंसकैटभयोर्वर्णयोर्वापर्यप्रसक्त्याजेन तत्तादात्म्यदृढीकरणात्
पूर्वोवस्थात उत्कर्षयोः विभावनाच्चानुभयाभेदरूपकं वेधाहेयाभ्रमंव क्रोकान्ता स्तकनकेषुच तासते
स्वयमनामसक्तः सातानुगीनराकृतिः अत्रसातादिति विशेषणेन विरक्तस्य प्रसिद्धशिवतादात्म्यमुद्दि
श्यनराकृतिरितिदिव्यमूर्तिर्वैकल्प्यप्रतिपादनात्पनाभेदरूपकं तथागते किमिति वेपत एषक्षिंपुष्कं
सेतमेथकृदन्तः किमसौ विभेति ह्रीयान्तरेऽपि नहि तेस्पवशं वदेत्रतो राजपुंगव निषेवत एव लक्ष्मीः
अत्रत्वं सेतमेथकृदिति सेतोरमृतमथनस्य कर्तापुरुषोत्तमेन वर्णनीयस्य तादात्म्यमुक्तात यापित
नः८ रामनेसेतवंधनाय मंथनायचेतिसं मुद्रेणोभेतयो ह्रीयानराणामपित्वत्तु वशंवदत्वेन एवं वहीपा
तैर्जेनत्वाभावात्त्वामलक्ष्मीकत्वेन मंथनप्रसक्त्यभावाच्चेति पूर्वावस्थात उत्कर्षविभावनादधिकाभे
:दरूपकं किंपद्मस्यरुचिं नहन्ति नयनानंदं विधत्ते नकिं वृद्धिंवाझषकेतनस्यकुरुते नालोकमात्रे
किंवक्रेन्दौ सत्यमस्तापपदनपरः शीतांशुरुतं पतितेदर्पस्मादमनेन चेदिह तदप्यस्यैव विनाधरे अत्रा

ऊ० टी० गतं यस्त्वयाभीतं भक्तं गजेन्द्रयात्रायतेस्म सोयमादिपुरुषो नमइति रूद्राभिः संसारभीत्यातद्यार्थि
९ नीभिः कृष्णोयमद्युरोपविशन्दृष्टः यस्त्वयाचंचलत्वेनप्रसिद्धपाः स्त्रियोपिकामोपचारैर्वेदग्ध्येनति
त्यवल्लभः सोयंदिव्ययुवेतियुवतीसमूहैः सोत्कंठंदृष्टः बालाभिस्तुबालगतरूपवेषालंकारदर्शन
मात्रलालसाभिर्यथावस्थितवेषादियुक्तो दृष्टइति बहुधोल्लेखः पूर्वंकामत्वाद्यारोपेण रूपकसंकीर्णः
अयंतशुद्धइतिभेदः एकेनबहुधोल्लेखेप्यसौ विषयभेदजः गुरुर्वचस्यर्जुनोयंकीर्तौ भीष्मः शरास
6 ने २२ गृहीतृभेदाभावेपि विषयभेदाद्बहुधोल्लेखनादसावुल्लेखः उदाहरणं श्लेषसंकीर्णं वचो विष
ये महान्त्युक्तियादिवत्प्रदस्यतिदित्यादिष्वर्थान्तरस्यापिकरीकरणात् शुद्धोयथा अक्रूरः कंसजयोः
कृशांविलग्नेविपुलेचवल्गु षिविस्मरन्तेनितंबे अरुणाधरमाविरस्तुचित्ते करुणाशालिकपालिभागधे
यं स्मात्स्मृतिभ्रान्तिसंदेहैस्तदाकालंकृतित्रयं पंकजंपश्यतः कान्तामुखंमेगाहतेमनः २४ अयंप्रम
न्नमधुपस्तन्मुखेवेत्तिपंकजं पंकजंवासयाथार्थैश्चस्माकंनतत्तुनिर्णयः २५ स्मृतिभ्रान्तिसंदेहैः सादृ
श्यान्निरूढमानैः स्मृतिमान्भ्रान्तिमान्ससंदेहइतिस्मृत्यादिपदांकितमलंकारत्रयंभवतितत्रक्रमे ९
णोदाहृतं यथावा दिव्यानामपिकृतविस्मयंपुरस्तादंभस्तः स्फारदरविंदंवारुदस्तां उद्धोत्पश्चि·

ति पूर्वं परार्थं प्राधान्यमस्तीति वाच्यं प्रसन्नेनेति सामान्यधर्मप्रयोगादुपमितं व्याघ्रादिभिः सामान्याप्र
योगादिति तद्प्रयोग एवडुपमितसमासानुशासनात् अत्रस्य वीतरणोपयोगित्वं न स्वात्मना संभवत्य।
नस्तस्य प्रकृतदृगात्मना परिणत्यपेक्षणात्परिणामालंकारः यथा वा तीर्थीभूतेशमौलिस्रजम
मरधुनीमात्मना सोऽनुतीर्यस्तस्मै सौमित्रिमैत्रीमयमुपकृतवानान्तरस्त्राविकाय व्याख्यापिसत्तनीभिः
शावरयुवतिभिः कौतकोदंचदंतं कच्छादन्वीयमानाः तणमचलमथो चित्रकूटं प्रतस्थे अत्रारोप्य
माणानरः सौमित्रिमैत्रीरूपतापन्नया गृहोपकारलक्षणकार्योपयोगिनस्वात्मना गृहस्यरघुनाथे
कृपसाद्यपेतत्वेनवेन नार्थिनाभावादितिपरिणामः बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते स्त्रीभिः
कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरीक्षितः २२ यत्र नानाविधधर्मयोगादेकं वस्तु तत्तद्धर्मयोगरूपनिमि
त्तभेदादनेकेन गृहीत्रानेकधोल्लिख्यते तत्रोल्लेखः अनेकधोल्लेखनेरुच्यर्थित्वभयादिकं यथार्हं प्र
योजकं रुचिरभिरीतिः अर्थित्वं लिप्साभयं भीतिः स्त्रीभिरित्याद्युदाहरणं अत्रैक एव राजा सौंद
र्यादितरगुणपराक्रमशालीति स्त्रीभिरर्थिभिः प्रत्यर्थिभिश्च रुच्यर्थित्वभयैः कामकल्पतरुःकालरू
पोल्लेखः यथा वा राजन्त्रातेति हृष्टाभिः श्रीकांत इति पौरैः यथास्थितमश्वबालाभिर्दृष्टः शौरिःसकौ।

भ्र.द. यथा वा मेचकान्तभूमिषु परमूलशिलासहस्रसंसक्तरत्नकिरणैः स्फुरन्तींद्रुमच्छायामृगाः ग्रासकरत्व·
२ तिपामरोक्तिस्तेषां कथंचिद्रूपितत्रनहिप्रसक्तिः अत्रचंद्रमध्येमेचकनकालिकमंदरशिलासंबद्धरत्नकिरण
किरणस्येवच्छायादीनां संभवोनास्तीतिच्छायात्वाप्यपह्नवः यामरवववनोपन्यासेनाविष्कृतः अन्यत्रत
स्यारोपार्थः पयस्त्वापह्नुतिस्त्वसः नायंसुधांशुः किंतर्हि सुधांशुप्रेयसीमुखं यत्रक्वचिद्वस्तुनितदीय·
धर्मनिह्नवः अन्यत्रवर्णनीयेवस्तुनितद्धर्मस्यारोपार्थः साएवंस्त्वापह्नुतिः यथाचंद्रेचंद्रत्वनिषेधः
7 वर्णनीयेवस्तुनिप्रेयसीमुखत्वस्यारोपार्थः यथावा हालाहलंनैवविषंविषंरमाजनः परंव्यत्ययम·
न्वतेनिपीयजागर्त्तिसविनतंशिवः स्पृशन्निमांमुह्यतिनिद्रयाहरिः पूर्वोदाहरणेहेतूक्तिंविनास्य·
त्रतुसास्तीतिभेदः ततश्चपूर्वोपह्नुतिवदत्रापिद्वैविध्यंद्रष्टव्यमितिभ्रान्तापह्नुतिरन्यस्यशंकायांभ्रांति
वारणे तापंकरोतिसीत्कंपंचत्वः किंसखिनस्मरः अत्रतापंकरोतीतिस्मरहेतुनोक्तेतेकथितेतस्यज्वरसा
धारण्यादन्नतुप्यासख्योत्तरः किमितिपृष्टेनसाविस्मरइतिनत्वोक्ताभ्रांतिवारणंकृतं यथावा ना
गरिकसमर्थिकोत्रतिरिहसहिष्णुः कोयमुभयतःपृष्टः नहिनहिकरिकलभोयंशृंगारेहोयमस्यन ७
तपृष्टः इदंसंभवतभ्रांतिपूर्विकायांभ्रांतापह्नुताबुदाहरणं कल्पितभ्रांतिपूर्विकायथा जसनेयंवे

यमिव कांचिदुन्नरनीमस्या वीक्ष्य जलनिधिमंथनस्य शौरिः पूर्वत्र स्मरतिमनुदाहरणे सहशसेव स्मृतिः अ
त्र सदृशलक्ष्मीस्मृतिपूर्वकं तत्सदृशपि नोजलनिधिमंथनस्यापि स्मृतिरिति भेदः पलाशकुसुमभ्रांत्या
शुकतुंडे पतत्यलिः सोपि जंबूफलभ्रांत्या तमलिं धर्तुमिच्छति अत्रान्योन्यविषयभ्रांतिनिबंधनः पूर्व
स्माद्विशेषः जीवनग्रहणे नम्रा गृहीत्वा पुनरुन्नताः किं कनिष्ठाः किमु ज्येष्ठा घटीयंत्रस्य दुर्जनाः
पूर्वोदाहृतासंदेहः प्रसिद्धकोटिकः अयं तु प्रसिद्धकोटिक इति भेदः शुद्धापह्नुतिरन्यस्यारोपार्थो ध·
र्मनिह्नवः नायं सुधांशुः किं तर्हि व्योमगंगासरोरुहं १९ वर्णनीये वस्तुनि तत्सदृशधर्मारोपफल
कस्तदीयधर्म[illegible]निह्नवः कविमतिविकासोत्प्रेक्षितत्वधर्मांतरस्यापि वा निह्नवः शुद्धापह्नुति
र्यथा चंद्रे गुनदीपुंडरीकत्वारोपफलकस्तदीयधर्मस्य चंद्रत्वस्यापह्नवः यथा वा अंके केपि शशंकि
रे जलनिधेः पंकं परे मेनिरे सारंगं कतिचिच्च संजगदिरे भूच्छायमैच्छन् परे इंदौ यद्दलितेंद्रनीलशकल
श्यामं दरीदृश्यते तत्सांद्रं निशिपीतमंधतमसं कुक्षिस्थमालोकयते अत्रोत्प्रेक्षितधर्माणामपह्नवः
परपततोऽन्यासाद्दृश्यसिद्धः स एव युक्तिपूर्वश्चेदुच्यते हेत्वपह्नुतिः नेंदुस्तीव्रो न निशि पर्कः सिंधोरौ
र्वोऽयमुत्थितः २० अत्र चंद्रे तीव्रत्वे नैशत्वयुक्तिभ्यां चंद्रत्वसूर्यत्वापह्नवो वडवानलत्वारोपार्थः य

अ०-द० द्रं नीजारङ्गं तं धस्यो भूर्लीभवीथिपा पतिं कुन्त्राप्रविततः अङ्कुरास्मीत्यध्यवसायत् कैतवापह्नुतिर्व्यक्तौ
८ व्याजाद्यैर्निह्नुतेः पदैः निर्यान्ति स्मरनाराचाः कान्तादृक्पातकैतवात् ३१ अत्र सत्यत्वाभिधायिना कै-
तवपदेन नेमे कान्ताकटाक्षाः किन्तु स्मरनाराचाः इत्यपह्नवः प्रतीयते यथा वा रिक्तेषु वारिक।
थ्यया विपिनोदरेषु मध्याह्नजं भिनमहातपतापतप्ताः स्कंधांतरोत्थितरवाग्निशिखाच्छलेन निःशंस
सार्ध्यतरवे जलमर्थयन्ते संभावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना उक्तानुक्तास्पदाद्यात्र सि-
द्धासिद्धास्पदे परे ३२ घनमस्मिन्तमः शंके कोकी विरहशुष्मणा लिंपतीव तमो गानि वर्षतीवाञ्ज-
नेन नभः ३३ रक्तौ तवांघ्रि मृदुलौ भुवि विक्षेपणाद्ध्रुवं त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशी ३४ म-
ध्यः किं कुचयोः पुष्ट्यै वद्धः कनकदामभिः प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति ३५ अन्यधर्म-
संबंधनिमित्तेनान्यस्यान्यतादात्म्यसंभावनमुत्प्रेक्षा सा च वस्तुहेतुफलात्मगोचरत्वेन त्रिविधा त-
त्र वस्तुनः कस्यचिद्वस्त्वन्तरतादात्म्यसंभावना प्रथमा स्वरूपोत्प्रेक्षा इत्युच्यते अहेतोर्हेतुभावेना-
फलस्य फलत्वेनोत्प्रेक्षा हेतूत्प्रेक्षा फलोत्प्रेक्षेत्युच्येते अत्राद्या स्वरूपोत्प्रेक्षा उक्तविषयानुक्तविषया
चेति द्विविधा परे हेतुफलोत्प्रेक्षे सिद्धविषयासिद्धविषया चेति प्रत्येकं द्विविधे एवं षट्सामुत्प्रेक्षाणां ८

णी कृतनकचकलापो न मरालं अलेकस्तूरी यं शिरसि शशिरेखा न कुसुमं इयं भूतिर्नांगे प्रियविर
हजन्मा धवलिमा पुरारातिभ्रांत्या कुसुमशर किं मां प्रहरसि अत्र कल्पितभ्रान्तिर्जनितेयमिन्या
दिनिषेधस्तत्र प्रणोन्नेयाया एवंवत् प्रस्तावात् इंगीतवचनतत्वाख्यानोपमेत्युपमाभेदं मेने यदाह
नपमेत्युपमेवेदं नमौ वतदीपमे इति विपर्यस्तरूपता तत्वाख्यानोपमामतेति छेकापह्नुति
रन्यस्य शंकातस्तथ्यनिह्नवे अजस्य नमत्यदेलग्नः कान्तः किं न हि नूपुरः कस्याचित्कांचित्प्रति रह
स्योक्तावन्येन श्रुतायां इत्थं समाधानं इदं वर्णितेनातस्य निह्नवे छेकापह्नुतिः यथानायिकयान
र्मसखीं प्रति प्रजल्पन्मम पदे लग्नः इति स्वनायकवृत्तान्ते वर्णमाने तदाकर्ण्य कान्तः किमिति शंकितन
वनीमन्यां प्रति न हि नूपुर इति निह्नवः यथा वा सीत्कारं शिक्षयति व्रणयत्यधरं तनोति रोमांचं
नागरिकः किं मिलितो न हि न हि समीरे हेमन्तः पवनः इदमर्थयोजनया तथ्यनिह्नवे उदाहरणं श
ब्दयोजनया यथा पदेवन्नपने स्मराग्नि सततं भातो भवेत्स्वकान्तले नीले मुख्यति किं करोमि महितैः क्री
तोस्मिते विभ्रमैः इत्युक्त्वा शमवचोऽतिशान्तमसमस्तध्यानमिर्भर्त्सिते तोरोयया कुसुमस्तनपरमेवतद्वपदिशन्की
इतिरिः धनवः सर्वानिर्दिष्टविषयान्तनयोजने उदाहरणं विषये कोपि ग्रवस्याभेदेन योजने यथा व

ऊ.द. णीयधर्म्युत्प्रेक्षितायां धर्मोत्प्रेक्षितायां वस्त्वेव हेतुविषयं हेतुत्वं चरणयोस्तनःसिद्धत्वेनामीवस्तुनो विलेपनं न हेतुरिति
९ अहेतोस्तस्य हेतुत्वेन संभावनाद्धेतूत्प्रेक्षिता विलेपनस्य विषयस्य सत्त्वात्सिद्धविषया वेदनमविरोधेन।
भाविकेनापिकावदनकान्तिप्रेप्सा न हेतुरिति तत्र तद्धेतुसंभावनाद्धेतूत्प्रेक्षिता वस्तुतस्तदिच्छाया अभा।
वादसिद्धविषया मध्यः स्वयमेव कुचोपरतिनतकनकदामवद्धेनाथवमितायावलित्रयशालिताया
वलादिति मध्यकर्तृककुचधृतेस्तत्फलत्वेनोत्प्रेक्षितासिद्धविषयाफलोत्प्रेक्षिता जलजस्य जले निजावस्थि·
तेर्हृदवासतपसेनाथवासितायाः कामिनी [illegible] चरणसायुज्यप्राप्तिर्न फलमिति तस्या गगनकुसुमाय
मानायास्तपःफलत्वेनोत्प्रेक्षणादसिद्धविषयाफलोत्प्रेक्षिता अनेनैवक्रमेणोदाहरणान्तराणि वाले
न्दुवक्राण्यविकाशभावाद्बभुः पलाशान्यतिलोहितानि सद्यो वसन्तेन समागतानां नखक्षतानीव व·
नस्थलीनां अत्र पलाशकुसुमानां वक्रत्वलौहित्यसंबन्धेन निमित्तेन वसन्तनायकसमागतवनस्थली
संबन्धिसखः कृततनखक्षततादात्म्यसंभावनादुक्तविषयास्वरूपोत्प्रेक्षिता पूर्वोदाहरणे निमित्तभूतधर्म
संबन्धो गम्य इह तूपात्त इति भेदः कृतः नन्विवशब्दस्य सादृश्यपरत्वेन प्रसिद्धत्वान्नाद्रुपमैवास्तु लिंपतीस्स
दाहरणे लेपनकर्तृरूपमानत्वार्हस्य क्रियोपमर्जनत्वादिह तावदनानामस्योपमर्जनत्वस्योपमावाय· ९

धूमस्तोमेत्यादि नाश्रमे ... रजनीमुखे सर्वत्र विस्तृतस्य तमसो नैल्यदृष्टिप्रतिरोधक
त्वादिधर्मसंबंधेन गम्यमानेन निमित्तेन नभसः प्रियविरहितसर्वदेशस्थितकोकांगनाहृदयगत·
प्रज्वलित्वाद्विरहानलधूमस्तोमतादात्म्यसंभावनास्वरूपोत्प्रेक्षा तमसो विषयस्योपादानात्तु।
क्तविषयालमोक्षा गगनस्य नभसः कृत्स्न निरूपणं येन सकलवस्तुमांसलमलिनीकरणेन निमित्तेन तमःक
र्तृकलेपनकर्मतादात्म्योत्प्रेक्षा तान नभसः कर्तृकांजनवर्षणतादात्म्योत्प्रेक्षा चानुक्तविषया स्वरूपोत्प्रेक्षा
उभयत्रापि विषयभूतस्य तमसो व्याप्तत्वस्यानुपादानादनुक्तविषयानन्तरं तमसो व्यापनेन निमित्तेन
लेपनकर्तृतादात्म्योत्प्रेक्षा तान नभसो भूपर्यंत गाढनीलिमव्याप्तत्वेन निमित्तेनांजनवर्षणकर्तृता
दात्म्योत्प्रेक्षा चेति उत्प्रेक्षाद्वयमनुक्तविषयमेवास्त्वमेवं लिंपतीव वर्षतीत्यत्र व्याख्यातयोः कर्तृवाचक
त्वेपि भावप्रधानमाख्यातमिति स्मृतेर्धात्वर्थक्रियायाः प्राधान्येन तदुपसर्जनत्वेनान्वितस्य कर्तृक
स्योत्प्रेक्षणीयत्वे यान्यत्रान्वयासंभवात् अत एव हेतोस्तस्योपमायामप्युपमानत्वपक्षान्वयोदाहरणानि रा
कृतः कर्तापि पुरुषमानं स्यात्प्रभृतोसौ क्रियापदे स्वक्रियासाधने व्यग्रो नाग्लमन्यदपेक्षितं इति के
चित् तदन्येन नभसो विषयत्वे त्वकर्तृकलेपनवर्षणस्वरूपधर्मोत्प्रेक्षेत्याहुः तन्मते स्वरूपोत्प्रेक्षा

कु०द० १० दमानन्दयोरुभयोरुपकारैः अत्र विवक्षिताकृतं स्वकिरणैः सहजनलोचनानां नयनमसदेव राजकान्तिप्र
तिहेतुत्वेनोत्प्रेक्षितमिति प्रसिद्धविषयाहेतूत्प्रेक्षा एवं विधुर्वर्धयितुं पयोधिं शंकोऽयमेणांकमृगांकि
येति यथा श्लिष्टोऽपि प्रियविप्रयोगे मम शोककोकीनयने कियेति अत्र वेदेणांकतनसदृदस्यहृदयं
सदेव नदानेन कृतमप्यवेदकीनत्वावरणस्य कोकाङ्गनाबाष्पस्रावणस्य च फलत्वेनोत्प्रेक्षितमिति सिद्ध
विषयाफलोत्प्रेक्षा रथस्थितानां परिवर्तनाय पुरातनानामिव वाहनानां उत्पत्तिभूमौ तुरगोत्तमा
नां दिशि प्रतस्थे रविरुत्तरस्यां अत्रोत्तरायणस्य परिवर्तनमसदेव फलत्वेनोत्प्रेक्षितमित्यसिद्धविष
याफलोत्प्रेक्षा एतावत्प्रभेदोत्प्रेक्षाः मन्ये शंके ध्रुवं प्रायो नूनमित्येवमादिभिः उत्प्रेक्षा व्यज्यते शब्दैरिवश
ब्दोऽपि तादृशः ३९ उत्प्रेक्षाव्यंजकत्वेन परिगणितानां शब्दानामप्रयोगेन व्यंग्योत्प्रेक्षा त्वत्कीर्तिर्भ्रम
णश्रान्ता विवेश स्वर्गनिम्नगां रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः पश्य नीलोत्पलद्वन्द्वान्निः
सरन्ति शिताः शराः ४० विषयस्य स्वशब्देनोल्लेखनं विनापि विषयिवाचकेनैव शब्देन ग्रहणं विषयनिग
रणं तत्पूर्वकं विषयस्य विषयिरूपतयाध्यवसानमाहार्यनिश्चयस्तस्मिन्सति रूपकातिशयोक्तिः
यथा नीलोत्पलशरशब्दाभ्यां लोचनयोः कटाक्षाणां च ग्रहणं निगरणपूर्वकं तद्रूपताध्यवसानं यथा

कस्याभावात् उच्यते उपमायामत्र कविविवक्षितेति रविनावेत्तैः सद्दवङ्क्षु शाकततयावसंततनापकसमागत
वनस्थलीसंबंधिमस्यविशेषणस्यानपेक्षितत्वादिह तद्रुपादानेन पलाशमुकुलानां नवत्वततादात्म्यसंभा
वनायामिव शाक्यमवस्थापयतीति तत्यात्मपवतद्विशेषणसाफल्यात् अस्मिंश्च संभावनायामपीवशब्दोह
रेति पन्ने वदनमाव भातीति पितशीवनतरंगाग्रैः समुद्रः फेनचंदनं ददाद यकौ विरिंचलिपतीव दिगंगनाः
अत्र तरंगाग्रैः फेनचंदनस्य प्रेरणं पेषणं तयोरस्मिन्नुत्प्रेक्ष्यते इति समुद्रस्य स्थितस्य चंद्रस्य प्रथमसमुद्रप्रेरणं
नानांकरणं दित्व्यापनं च समुद्रोपनतफेनचंदनकृततलेपनत्वेनोत्प्रेक्ष्यते उभयत्रक्रमेण समुद्रप्रा
नगतफेनचंदनपुंजीभवने दिशां धवलीकरणं च निमित्तमिति फेनचंदनप्रेरणकिरणव्यापणयोर्विष
योरनुपादानात् अत्र वक्तविषयास्वरूपोत्प्रेक्षा येषां तु पानेनत्र योः समुद्रचंद्रयो रेव तत्कर्तृकपेषणलेपन·
रूपयसौत्प्रेक्षेतिमतं तेषां मते पूर्वोदाहरणेऽथ मेतिधर्म्येतस्वतादात्म्योत्प्रेक्षा इहधर्मेतिधर्मसंस
र्गोत्प्रेक्षेतिभेदोवगंतव्यः रात्रौ रवेर्दिवा चंद्रस्य भावादिवदिवसप्रभः भूमौ प्रतापयशसी सृष्टवान् स
तनोदिने रात्रौ रवेर्दिवा चंद्रस्याभावः तत्रापि प्रतापयशःसर्गेन हेतुरितित्स्य तद्धेतुत्वसंभावनासिद्धवि
षयाहेतूत्प्रेक्षेता विवमततानाविषमेनेव भिन्नाश्रयगोमहत्स्तेण समं ज्ञातानां गात्रापिने ग्नयरतमये याखलने

कु.टी.
२१

स्तनमुक्ते गता स्वर्नीत्वमिव हर्तेन तस्य संभ्रमे नैव रचितो लीलां यथोल्लसत्केन न तितु लेन मुक्ताहारलसैव विभा
तिमिश्रा इति तन्नास्ति पालनक्रमभेदः यत्तु शुद्धापह्नुतिगर्भत्वं मुक्तं तत्र केनचित् निरपह्नुतं तेनैवाहारहा
सोत्प्रेक्षेत एवादिह त्वपर्यस्तापह्नुतिगर्भत्वं बंधु संकुलासावपह्नुत न स्यामस्तादैः स्वक्तादिशुनिवेशलात्
इदं तु पर्यस्तापह्नुतिगर्भत्वमुत्प्रेक्षायामपि संभवति तत्र स्वरूपोत्प्रेक्षायां यथा जानेनिरागमादिदम
वविंवविंव स्पष्टक्तमितो भ्रमत्त्व नयनैर्विशेषावगमात्समानं नास्तिभ्रमोऽभूदनयोर्जनानां अत्र प्रसि
द्धफलेविंवतामपह्नुत्यानि रागाणालिभिन्नदमयंत्यधरे तद्रूपोत्प्रेक्षा पर्यस्तापह्नुतिगर्भा हेतूत्प्रेक्षा
यां तन्नगर्भत्वं प्राकृत्विति तेहेतूत्प्रेक्षोदाहरणपवहश्यते यथोपकारेषु यहैन त्वमपह्नुत्यान्यत्र नि
वेशिते फलोत्प्रेक्षायां यथा रविसोगजः प्रमानतः स्नात्वापिनं पुवसैविघातिनेत्यादौ गजस्ना
नेहितिफलं अप्रसिद्धः प्रतिफले स्नानेफलत्वमपह्नुत्य पापनयनेन निवेशिते अलेम
नयाप्रसक्तानुप्रसक्तापह्नुत्यमलनुसरामः भेदेऽतिशयोक्तिः स्यात्तस्यैवान्यत्ववर्णनं अन्यदेवास्य गां
भीर्यमन्यद्धैर्यं महीपतेः २९ अत्र लोकप्रसिद्धं गांभीर्यं भेदेऽपि भेदो वर्णितः यथा वा अन्येयं रूप
संपत्तिरन्या वैदग्ध्यधोरणी नैषा नलिनपत्राक्षी सृष्टिः साधारणी विधेः संबन्धातिशयोक्तिः स्याद्द्वयो। ११

ता॥ वापी कापि स्फुरति गगने तत्परं सूक्ष्मपद्या सोपानालीमधिगतवती काञ्चनीमैन्द्रनीली। अग्रे शै
लौ सुकृतिसुगमौ चन्दनाच्छन्नदेशौ तत्रत्यानां सुलभममृतं सन्निधानात्सुधांशोः॥ अत्र वाप्यादिशब्दै
र्नाभिप्रभृतयो निगीर्णाः॥ अत्रातिशयोक्तौ रूपकविशेषणं रूपके दर्शितानां विधानामिहापि संभवो
स्तीत्यतिदेशेन प्रदर्शितार्थं॥ तेनात्राप्यभेदातिशयोक्तिरूपातिशयोक्तिरिति द्वैविध्यं॥ तत्राप्याधि
कान्यूनतादिविभागश्चेति सर्वमत्रसंधेयं॥ यथा वा॥ समाबद्धग्रामैकपवनचकोरैरत्र सूतः किरन्नुज्यो
त्स्नामक्षीनवलवलिपाकप्रणयिनीं॥ अथ प्राकोणप्रदिग्भागेनयेन नर्कयमनागनाकाशकोयं गलितद २१
दिग्गः शीतकिरणः॥ अत्र कोयं गलितस्पृहस्तिगाइत्यत्र मागुप्तिचंद्राङ्कदः ततउक्तिसुगर्भितः एवमन्य
त्रापूहनीयं॥ यथापङ्क्तिगर्भितं सेवसापङ्क्तावामता स्वच्छक्तिउसः पावनं मृंगालाः पशुपतिलोविधौ इ
अत्रत्वन्यूक्तिसामर्थ्यमेवावगतमित्यतिशयोक्तिः चंद्रमंडलस्यामवस्थेन भवतीत्यपङ्क्तिगर्भा॥ यथा वा
मुक्ता विद्रुममंतरा मधुरसः पुष्पं परं पल्लवे॥ प्रालेयप्रुति मणिकलेवरवलनयोरसिकानार्णवे नवोदंचति
स्थंवस्तु दृष्टिं न पुनः पूर्वीचलाभ्यंतरेता नीमानि विकल्पयंतितन्मेये धीन माहक्षणे॥ अत्राधररसप्रथम
प्रभृतिनामतिशयोक्तिः पुष्परसेन मधुरसस्यापङ्क्तिगर्भा॥ अलंकारसर्वस्वक्रमस्तु पोन्यैतावांस्तापङ्क

ऊ॰ दृ॰ गलिता निपुणे बलयात्पराणि तथैव दन्तानि प्रत्यक्षाणि शाखोक्तिस्तयोर्विपर्ययव्यतिक्रमे मुग्धे मानो
१२ गतः पश्चादनुनीताश्रियेणमायथावा कवीन्द्राणामाश्रमनृपस्यमनदमेवनासरणंश्चलहंगासमाकु व२
लक्रतिमदामोदमधुपाः अमी पश्चात्तेषाम् अपरिपतिताः स्वन्नपतेः कटान्ताः हीरोद्गमरुवकुकवीची॰
सहचराः पतन्ति स्त्री प्रतिपादितेनायः कार्यंयो अपन्यापत्नायोः वर्ण्यानामितरेषां वा धर्मैक्यं तुल्य
योगिता संकुचन्ति सरोजानि स्वैरिणीवदनानि च तदङ्गमार्दवं द्रष्टुः कस्य चित्ते न भासते मालतीशशभृल्ले
खाकदलीनां कठोरता प्रस्तुतानामप्रस्तुतानां वा गुणक्रियारूपैकधर्मान्वयस्तुल्ययोगितासंज्ञं चेति ल्यद्द
तिप्रस्तुतत्वे तुल्ययोगितायामुदाहरणं तत्र प्रस्तुतत्वेऽप्युदयकालीनतया वर्णनीयानां सरोजानां प्रकाश
भीतस्वैरिणीवदनानां च संकोचरूपैकक्रियान्वयो दर्शितः उत्तरश्लोके नायिकासौकुमार्यवर्णनेऽप्र
स्तुतेष्वप्रस्तुतानां मालत्यादीनां कठोरतारूपैकगुणान्वयः यथा वा संजातपत्रप्रकराञ्चितानि प४
समुद्वहन्ति स्फुटपाटलत्वं विकस्वराण्यर्ककराभिमर्शाद्दिनानि पद्मानि च वृद्धिमीयुः नागेन्द्रहस्ता
स्त्वचि कर्कशत्वादेकान्तशैत्यात्कदलीविशेषः लब्ध्वापि लोके परिणाहिरूपं जातास्तदूर्वोरुपमान
बाह्याः अत्र ग्रीष्मवर्णने दीर्घत्वेन प्रस्तुतानां दिनानां पद्मानां चैकक्रियान्वयः ऊरुवर्णने अप्रस्तुता। १

22

पुर्णेऽस्ति ४ यथा वा कतिपयदिवसैः ... यंप्रयायात्पान ... रिः स्तनजानरावसानः ३ ॥१

रोयोगकल्पनं सौधाग्राणि पुरस्यास्य स्पृशंति विधुमंडलं निर्विनिमुदमुपयाति चक्रवाकी वितरणशालिनि वी
रस्रुद्देवे अत्र चक्रवाकाः सूर्यास्तमयकारकस्य हास्ये स्मृतयसंभावनाप्रयुक्तसंतोषासंबंधोवर्णि
तः योगेप्ययोगोऽसंबंधातिशयोक्तिरितीर्यते त्वयि दातरि राजेन्द्र स्वर्द्रुमान्नाद्रियामहे ४ अत्र स्वर्द्रु
मेष्वादरसंबंधेपि तदसंबंधो वर्णित यथा वा अनयोरनवद्यांगि स्तनयोः जृंभमाणयोः अवकाशो न
२५ पर्याप्तं बाहुलतान्तरे अक्रमातिशयोक्तिः स्यात्सहत्वे हेतुकार्ययोः आलिंगति समं देव ज्यां शरा
श्च पराश्च ते ४ अत्र यदा मौर्व्याः संधानं तदानीमेव शत्रवः तिनेपतंतीति हेतुकार्ययोः सहत्वं वर्णि
तं यथा वा मुंचति मुंचति कोशं भजति च भजति प्रकंपमरिवर्गः हम्मीरवीरखड्गे त्यजति त्यजति क्षमामाशु
अत्र खड्गस्य कोशत्यागादि समकालं अरिपुरापमृत्युत्यागादि वर्णितः चपलातिशयोक्तिस्तात्
९५ कार्यं हेतुप्रसक्तिजे यास्यामीत्युदिते तन्व्या वलयोर्मिकाभवदत्र नायकप्रवासप्रसक्तिमात्रेण
योषितां तितकार्यं कार्यमुक्तिनेव प्रदर्शितं यथा वा आदातं सकुदीक्षिते पिकरुते मेत्थाग्रमालेदितं ९३
त्वतारंजनवार्तयापि सहसा रक्तेन तत्पादयोः अंगानामकुत्रले यत्न स्मरणमप्यत्यंतविद्रावृंहं तासी
ग्रस्त्राः किमन्यदलका मोक्षोऽपिभासायते यथा वा यामितया भोतिथेवदति पुरस्तात्तु पानत भृंगाः

उ०३० निहतो मत्तहस्तीघटो नागः सारदंसदन्तिः यथानुलिप्ताः कल्पशोभोऽवंद सरतमृदिताबालवनितादति।
१५ म्पासो मंते गलितविभवाश्चार्थिषु नृपाः अत्र प्रस्तुतानां नृपाणां अप्रस्तुतानां मण्यादीनां च सोऽस्ति कथ
मेवन्वयः प्रस्तुतैकनिष्ठः सामान्यो धर्मः प्रसंगादन्यत्र उपकरोतीति प्रसादार्थमारोपितो दीपे इत्यादि
वेति दीपसादृश्याद्दीपकं संज्ञायां चेति इवार्थे कन्प्रत्ययः समासेपि समासेवर्णितो बोधितव्यमिति प्रकृत।
तत्र श्रुतप्रकृताविप्रत्यप्रकृतानातिरेकिवितं इत्यत्र प्रस्तुतानाप्रस्तुतानां गतधर्मान्वयं प्र...तिभाति
मतेनभामिकल्पमत्रापस्तुतस्येदप्रथमेधर्मान्वयः तथापि प्रासंगिकत्वं नहीयतेवस्तुगत्याप्रस्तु
तोहेशेन प्रवृत्तस्येव धर्मिणस्याप्रस्तुतेष्वन्वयात् नहिदीपस्य प्रासादरथ्यायोर्युगपदुपकारकत्वेनजा।
माश्रर्थे प्रतिपस्य सूत्रस्य प्रतिनियमः प्रथमंपारेवेषणे तचप्रासंगिकत्वं हीयतेनन्वय योगितायां तु
केवलप्रस्तुतानामप्रस्तुतानां वैयत्येन धर्मान्वयाभ्यारेपि दीपकेनैव धर्मोक्तिरितिविशेषः अथवा तयोरपरो वि
शेषः उभयोरन्यतो रूपस्य लेकारस्य प्रस्तुतादिमेषुधि अत्राप्रस्तुतमुपमानं प्रस्तुतमुपमेयमिति तत्राव
स्थितउपमानोपमेयभावस्तत्रैव दीपकं गृह्णाति नेति कः सइति त्रिविधं दीपकाङ्गो भवेत् सहतिदीप
के सर्वमन्यं वदमाणोयमर्थो उपमानसूत्रे इति उक्तमीलितिकेदेशिन्तिस्फुटं तिक्तदृष्टान्तोक्रमाः मायेतिचानका १५

13

नां करिकराणां कदलीनां चैकगुणान्वयः हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता प्रदीयते परा
भूतिर्मित्रशात्रवयोस्त्वया अत्र हिताहितयोः मित्रशात्रवयोः कल्पक्षभूतिदानस्य पराभवदानस्य च
प्रवेषणभेदाच्च समायात वृत्तितौल्यं यथा वा यश्च निंबं परशुना यश्चैनं मधुसर्पिषा यश्चैनं गंधपु
माल्याद्यैः सर्वस्य कटुरेव सः अत्र वृश्चति सिंचति अर्चतीत्यर्थाद्द्वौरैवी क्यानि पूरणीयानि पूर्वोदाह
रणे स्तुतिपर्यवसायि इदं तु निंदापर्यवसायीति भेदः रूपं च समस्तलोकदाभरणेन तुल्ययोगिता
गुणोत्कृष्टैः समीकृत्य वचो ऽन्या तुल्ययोगिता लोकपालो यमः पाशी श्रीदः शक्रो भवानपि अत्र वर्ण
नीयो राजा शक्रादिभिर्लोकपालत्वेन समीकृतः यथा वा संगतानि मृगाक्षीणां तडिद्विलसितान्यपि
क्षणद्वयं न तिष्ठंति घनारब्धान्यपि स्वयं एवं चात्र स्तुतिरिति निंदा इयं काव्यादर्शे दर्शिता रसांतरस्य तुल्ययो
गितां सिद्धिरिति केचिद्व्याजहुः यदा तु ज्यायेद्वृसिद्धिः ख्यातेषु चेन्नाम कीर्तितेन तुल्यतोत्कर्षेयुवामे
वेदविद्यातोनवलैजलपिजलैः इति मतांतरं अथ वृत्तमाणदीपकमेव वदंति वर्ण्यावर्ण्यानां धर्मै
क्यं दीपकं बुधाः मदेन भाति कलभः प्रतापेन महीपतिः अत्र प्रस्तुताप्रस्तुतानामेकधर्मान्वयो दीपकं
यथा कलभनृपालयोः प्रस्तुतयोर्भानक्रियान्वयः यथा वा मणिः शाणोल्लीढः समरविजयी हेतिः

ऊ॰ द॰ निषेधानर्हत्वाद्विवक्षापूर्वकवैलक्षण्यप्रतिषेधो यमानिह्नापर्यवसित एवेति पर्यैका मन्त्रसंधेयं अथास्तुतिः
२४ प्रस्तुतानामप्रस्तुतानां वा प्रतिवस्तूपमा तत्प्रस्तुताप्रस्तुतानामिति विशेषः अयं चापरो विशेषः आवृ
तिदीपके वैधर्म्येण न भवति प्रतिवस्तूपमायां तु वैधर्म्येणापि दृश्यते यथा विद्वानेव हि जानाति विद्वज्ज
नपरिश्रमं नहि वृथा उपमाने वैधर्म्येणापि दृश्यते यथा विद्वानेव हि जानाति विद्वज्जनपरिश्रमं नहि व
न्ध्या विजानाति गुर्वीं प्रसववेदनां यदि सन्ति गुणाः पुंसां विकसन्त्येव ते स्वयं नहि कस्तूरिकामोदः श
पथेन विभाव्यते दृष्टान्तः बिंबप्रतिबिंबभावेन दृष्टान्तस्त्वलंकृतिः त्वमेव कीर्तिमान् राजन् विधुरेव हि कान्तिमा
14 न् ॥ ४२ ॥ यत्रोपमानोपमेययोर्वाक्ययोर्भिन्नावेव धर्मौ बिंबप्रतिबिंबभावेन निर्दिश्येते तत्र दृष्टान्तः अत्र की
र्तिमानित्यत्र कीर्तिकान्त्योर्बिम्बप्रतिबिम्बभावः यथा वा कामं नृपाः सन्तु सहस्रशोऽन्ये राजन्वतीमाहु
रनेन भूमिं नक्षत्रताराग्रहसंकुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः यथा वा देवीं वाचमुपासते हि ब
हवः सारं तु सारस्वतं जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः अब्धिर्लङ्घित एव वानरभटैः
किन्त्वस्य गम्भीरतामापातालनिमग्नपीवरतनुर्जानाति मन्थाचलः ननु दृष्टान्ते उपमानोपमेयवाक्ययोरुक्ति
नेन सधर्मस्यैव प्रतिबिम्बकथनात् ... ... जानातीत्यनेन सा २४

ते२

त्समासायां तिव्रशिलावलाः दीपकस्यानेकोपकारार्थतमतया दीपस्थानीयस्य शब्दस्यार्थस्य वा उभ-
योर्वा श्लाघ्यत्वं त्रिविधमावृत्तिदीपकं क्रमेणोदाहरणानि यथा वा उत्कंठयति मेघानां मा-
ला वर्गं कलापिनां यूनां चोत्कंठयत्यद्य मानसं मकरध्वजः शमयति जलधरधारा चातकयूनां तृष-
विरहयननां तापयति च वधूलोचनचलधारा कामिनां प्रवासरुचिं वदनेन निर्जितं तव निलीयते चंद्र-
विंबमंबरे अरविंदमपि च सुंदरि निलीयते पाथसां पूरे एवं चान्येषां प्रस्तुताप्रस्तुतोभयविषयत्वा-
दी६ भावेऽपि दीपकत्वव्यपदेशमात्रेणादीपकव्यपदेशः वाक्ययोरेकसामान्ये प्रतिवस्तूपमा मता तापेन भ्राज-
ते सूरः शूरश्चापेन राजते ॥५२॥ यत्रोपमानोपमेयपरवाक्ययोरेकः साधारणो धर्मः पृथङ्निर्दिश्यते सा
प्रतिवस्तूपमा प्रतिवस्तु प्रतिवाक्यार्थमुपमा समानधर्मोऽस्यामिति व्युत्पत्तेः यथात्रैव भ्राजते राजते इत्ये-
क एव धर्मः उपमानोपमेयवाक्ययोः पृथगभिन्नपदाभ्यां निर्दिष्टः यथा वा स्थिरा शैली गुणवतां खल-
बुद्ध्या न बाध्यते रत्नदीपस्य हि शिखा वात्ययापि न नाश्यते यथा वा नवाम्रतस्य दिनिपाद एककेन विवे-
कशालिना कथमन्यादृशेन स्थितेऽरविंदे मकरंदनिर्भरे मधुव्रतो नेक्षुरसं हि वीक्षते अत्र यद्यपि उपमे-
यवाक्ये अन्यादृशोपमानवाक्ये वीक्षते इति धर्मभेदः प्रतिभाति तथापि वीक्षणमात्रस्य वर्जनीयस्य ऐ।

ऊ· द· रेगौगैतु नारीणामिति श्लोकः प्राचीनैर्वाक्यार्थवृत्तिनिदर्शनायामुदाहृतस्तथापि विशिष्टयोर्धर्मिणोरै
१५ क्यारोपो वाक्यार्थवृत्तिनिदर्शना उपमानोपमेययोरन्यतरस्मिन्नन्यतरधर्मारोपः पदार्थवृत्तिनिदर्श
नेति व्यवस्थामाश्रित्यास्माभिरयमिहोदाहृतः एवं च त्वयि सति शिवदातर्यस्मदभ्यर्थितानामितरम·
नुसरतो दर्शयन्तोर्थिमुद्रां चरमचरणपातैर्दुग्धदोहायकामाः करभमनुसरामः कामयेनोष्ट्रिकायां·
पृ ५ दोग्ध्रीमिति तितीर्षुरेवार्थितदुग्धस्तनयुगलीवं इत्यादिषु वाक्यभेदाभावेपि वाक्यार्थवृत्तिरेव निदर्शना विशिष्ट
योरैक्यारोपसद्भावाद्वाक्यार्थयोरसदृशयोरिति लक्षणवाक्ये वाक्यार्थशब्देन बिंबप्रतिबिंबभावापन्नव
नं६ स्तुविशिष्टरूपयोः प्रस्तुताप्रस्तुतयोर्धर्मिणोर्विवक्षितत्वात् एवं च राजसेवा मनुष्याणामसिधारावलेह
नं पंचाननपरिष्वंगो व्यालीवदनचुंबनं इत्यत्र प्रस्तुताप्रस्तुतवृत्तान्तयोरैकैकपदोपात्तत्वेपि वाक्यार्थ
वृत्तिनिदर्शनायामनतिः तयोर्बिंबप्रतिबिंबभावापन्नवस्तुविशिष्टव्यापाररूपत्वादिति अत एव नि
दर्शनायां रूपकाद्भेदः रूपके च विशिष्टयोरेव मुखं चंद्र इत्यादिकयोरैक्यारोपः अंघ्रिदलं दरेदर्देवसुति
मोवल्लिनिदर्शने विपिनविहारमसृणनालदलोर्ध्वं देवस्तवः इति विशिष्टरूपकोदाहरणेपि न बिंबप्रतिबिं
बभावापन्नविशिष्टतानिविशेष्यकमलस्पि एतद्रूपमाधारणापर्यवसानसंपादनार्थमेव तत्र विशेष १५

गगायमन्तावधिप्रवर्तनसंस्पर्शिमात्रस्यविवक्षन्नादृश्रोसहृदयाणांपराहृत्तिर्दीपकाद्विशेषः पूर्ववन्त्र
न्नेतप्रसन्नविषयत्वकृतोह्युपमः तेषुधर्मिणाणप्युद्दृश्यते कृतंचगर्वाभिमुखंमनस्त्वयाकिमन्य
देवंनिहतास्त्रनोद्विषः तमांसितिहेनिदिनावतावदृष्टमात्रयावदयान्मुदपाद्विमौलितं वाक्यार्थ
योः सदृशयोरैक्यारोपोनिदर्शना यथातः सौम्यतासयंपूर्णेंदोरकलंकिता ५४ अत्रदान्तप्रकृष्ट
सौमनस्योपमेयवाक्यार्थस्यपूर्णेंदोरकलंकितत्वस्य उपमानवाक्यार्थस्यपरस्परमैक्यारोपः यथावा
अरण्यरुदितंकृतंशवशरीरमुद्वर्तितंस्थलेऽब्जमवरोपितंसुचिरमूषरेवर्षितं श्वपुच्छमवनामितं
बधिरकर्णजापःकृतोधृतोऽन्धमुखदर्पणोयदबुधोजनःसेवितः अत्राबुधजनसेवायाअरण्यरोदना
दीनांचपरस्परमैक्यारोपः यदार्थवृत्तिमप्येकेवदन्त्यन्यांनिदर्शनांत्वन्नेत्रयुगलंधत्तेलीलांनीला
ब्जजन्मनोः अत्रनेत्रयुगलेनीलाम्बुजगतलीलापदार्थारोपान्निदर्शना यथावा वियोगेगौडनारी-
णांकोगाढन्तर्पाण्डिमा अनुहरतितरांसावर्जीरीमञ्जरीणांगर्भेरत्नश्च एतस्मिन्नुदाहरणे उपमेयउपमानधर्मा
रोपः इहतूपमानेउपमेयधर्मारोपइतिभेदः उभयत्रापिअन्यधर्मस्यान्यत्रासंभवेनतत्समानधर्मादे
राक्षेपस्यपर्यवसानंतुल्यं इयंपदार्थवृत्तिनिदर्शनाललितोपमेतिजयदेवेनव्याहृता यद्यपिविपो

अ॰ द॰ द्वयोरत्र संबन्धस्यानिष्पर्यवसानमपि न समर्थं बोधयदेतन्न संभवतीति निबन्धनाद् असमर्थनिदर्शना । तथा उत्तरश्लो
१९ के । सविता स्वोदयसमयसमय एव स्वपक्षपुष्कलत्वमादधानस्तत्पणप्रमुखश्रियाधानक्रियया परोन्नतिसमृ
द्धीनां फलं स्वहृदयस्थग्रह एवेति निरूप्य स्वरसमर्थं बोधयन्निबद्ध इति सदर्थनिदर्शना यथा वा उन्नतं पदम
वाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवं शैलशेखरगतः पृषत्कणश्चारुमारुतधुतः पतत्ययः अत्रा
गिरिशिखरगतो वृष्टिबिंदुकणो मंदमारुतमात्रेणापि कंपितः पतन्न लघोरुन्नतपदप्राप्तिः पतनहेतु
रितीत्यसदर्थं बोधयन्निबद्ध इत्यसदर्थनिदर्शना । चूडामणिपदे धत्ते यो देवं रविमागतं सतां कार्या
तिथेयीति बोधयन् गृहमेधिनः अत्र समागतं रविं शिरसा संभावयन्नुदयाचलः स्वनिष्ठयारविषयरण
क्रियया समागतानां सतां एवं गृहमेधिभिरातिथ्यं कार्यमिति सदर्थं बोधयन्निबद्ध इति सदर्थनिद
निबंधनी र्शना । अत्र केचिदाहुः वाक्यार्थनिष्ठनिदर्शना पदार्थवृत्तिनिदर्शना द्वयं ह्यसंभवद्वस्तुसंबंधनिबंधनमिति तन्नी
यात् संभवद्वस्तुसंबंधनेति स्यादुक्तं इति तथा हि आद्यनिदर्शनायां वाक्यार्थयोरैक्यमसंभवन्नुपयोः
साम्यपर्यवसानमिति द्वितीयनिदर्शनायामप्यन्यधर्मोऽन्यत्राहे भवतु परिमाणोः साम्यपर्यवसानमिति तन्नी
य निदर्शनायां न हि क्रि [illegible] सदर्थबोधने संभवदेतत्समन्तां गभीकरोति बोधयन्नाह मेथि १९

णोपादानात् यद्वा तनुसौम्येनेत्यादिनिदर्शनोदाहरणेषु रात्रेरौक्षादीनामानंदकरत्वादिनैवात्रवि
शेषणयोर्बिंबप्रतिबिंबभावाभावात् यत्र त्वविषयविषयिविशेषणानां परस्परसादृश्येन बिंबप्र
तिबिंबभावोऽस्ति ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थीन्यंतर्धानव्यसनरसिका रात्रिका
पालिकीयं द्वीपाद्द्वीपं भ्रमति दधती चंद्रमुद्राकपाले न्यस्तं सिद्धांजनपरिमलं लांछनस्य च्छलेन १
नि सावयवरूपकोदाहरणे तु विषयविषयिणोस्तद्विशेषणानां च प्रत्येकमेवारोपः ननु ज्यो
त्स्नादिविशिष्टरात्रिरूपविषयस्य भस्मादिविशिष्टकपालिकीरूपविषयिणश्च विशिष्टरूपेणैकारो
पोऽस्ति तस्मादत्र सेवामतुष्याणमिति ज्ञातवपि वाक्यार्थवृत्तिनिदर्शनेति युक्तं मतांतरेतिरूपदा
र्थवृत्त्येव निदर्शना भाव्या अपरां बोधनं प्राहुः क्रियया सदसदर्थयोः नश्येद्राजविरोधीति क्षीणं चं·
द्रोदये तमः ५५ उदयन्नेव सविता पद्मेष्वर्पयति श्रियं विभावयन् समृद्धीनां फलं सुहृदनुग्रहं कस्य
चित्किंचित्क्रियया विशिष्टस्य क्रियया परान्प्रत्यसतः सतो वार्थस्य बोधनं यन्निबध्यते तदपरां निदर्श
नामाहुः असदर्थबोधने उदाहरणं तत्र नश्येदिति बोधयदिति वक्तव्ये बोधयदितस्यागमस्समा
नत्वादप्रयोगः ननु क्षीणतां चंद्रोदयात् सहविरुद्धस्य क्षयं नाशक्रियया दृष्टांतभूततया अन्योऽप्येवं राजविरु·
द्धि विधितमः स्वकीयपक्षक्षयाः

कु॰ द॰ तेवकीनां जनैः जनरंजनशस्त्रकैः अनेन सार्द्धं विहरांबुराशेरित्यादौ न सहोक्तिरलंकारः विनोक्तिश्चे
१२ द्विनाकिंचित्प्रस्तुतं हीनमुच्यते विद्याहृद्यापि सावद्या विना विनयसंपदं यथा वा पक्षगामं नयपथे
त्वं पंचरामो न पश्यतिनिंदितः स भवे लोके स्वात्माप्येनं विगर्हयेत् अत्र रामदर्शनं विनानिंदितत्वावि
नाशब्दमंतरेणापि प्रदर्शितं तद्धेकिंचिद्विनारम्यविनोक्तिः सापि कथ्यते विनाखलैर्विभात्येषा राजें
द्र भवतः सभा यथा वा आविर्भूते शशिनि तमसा मुच्यमानेव रात्रिर्नैशस्यार्चिर्हुतभुज इव छिन्नभूयिष्ठ
धूमोहेनांतर्वरतनुरियं लक्ष्यते मुक्तकल्पा गंगारोधः पतनकलुषा गृह्णतीव प्रसादं अत्र तमः प्रभ
27 तीनि विनानिशादीनां रम्यत्वं विनाशब्दमंतरेणादर्शितं समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चे
त् अयमैंद्रीमुखं पश्य रक्तश्चुंबति चंद्रमाः यत्र प्रस्तुते वृत्तांते वर्ण्यमाने विशेषणसाम्यबलादप्रस्तु
तवृत्तांतस्यापि परिस्फूर्तिस्तत्र समासोक्तिरलंकारः समासेन संक्षेपेण प्रस्तुताप्रस्तुतवृत्तांतयोर्वर्ण
नात् उदाहरणमयमैंद्रीति अत्र चंद्रस्य प्राचीप्रारंभसंबंधलक्षणोदयवर्णनेऽस्याप्रस्तुतार्थसंबंधप
मात्रपरस्य शब्दार्थानवधारणात् चंद्रमसः शब्दप्रसिद्धलिंगेन पुंस्त्वीगत स्त्रीलिंगेन नतत्वतिपाद्येंद्रस
वंधितेन चोपस्कृतात् प्रस्तुतपरत्वनितामलकशुकभूक्तर्मितः प्रतीयते यथा वा व्यावल्गत्कुचभारमा १२
मानेषु वेशदस्य प्रारंभवदनसाधारणाद्रक्लशाह्रस्यारुह...ग्रकसाधारणाच्चुंवंती २

न्तरन्यादौ कारीषोऽग्निरध्यापयतीति वन्हसमर्थाचरणे णिचः प्रयोगः ततश्च यथा कारीषोऽग्निः शीताप
१७ नयनेन बटूनध्ययनसमर्थान्करोति एवं वर्ण्यमानः पर्वतः स्वयमुपमानभावेन गृहमेधिन उक्तवो
यनसमर्थान्करोतीति मतं यथा एवं पर्वतः समागतरविशिशिरत्वाभावयति एवं गृहमेधिनः समागतसंतप्तशुचि
न एजपानमावयदिति अन्नः संभवति वोपनसंबंधइति व्यतिरेको विशेषश्चेदुपमानोपमेययोः शै।
लाइवोन्नताः संतः किंतु प्रकृतिकोमलाः अयमुपमेयाधिक्यपर्यवसायी व्यतिरेकः यथा वा पल्लव
तः कल्पतरोरेव विशेषः करस्यते वीरभूषयति कर्णमेकः परस्तु कर्णं तिरस्करोते तन्न्यूनत्वपर्य
वसायी यथा रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया गुणैस्त्वामायांति शिलीमुखाः स्मरधनुर्मुक्ताः
स्तथा मामपि कांतापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः सर्वं तुल्यमशोक केवलमहं धात्रा स।
४ यो शोकः कृतः अनुभयपर्यवसायी यथा द्रुतररितिवत्सुखेः कोशनिघर्षणस्य सहजमलिनस्य कृपाणस्य कृ
पाणस्य च केवलमाकारतो भेदः सहोक्तिः सहभावश्चेद्भासते जनरंजनः दिगंतमगमत्तस्य कीर्तिः प्र
त्यर्थिभिः सह यथा वा छायासंश्रयते तलं विटपिनां श्रांतेव पांथैः समं मूलं याति सरोजलस्य जडता
ग्लानेव मीनैः सह आतामत्यहिमांशुदीधितिरपस्तमेव लोकैः समं निद्रागर्भगृहं सह प्रविशति क्लां

अ॰ र॰ ह किं त्वेतत्तस्त्रैयमित्यादौ तत्र रात्रमस्या एकदेशविवर्त्तिरूपकोदाहरणेऽत्र प्रस्तुते प्रस्तुतरूपस
१८ मारोपणमकस्याप्यभावात् तत्र विद्युन्नयनैरित्यत्र निगीर्णत्वेनोपात्तस्तु नरपदार्थप्रधानमस्प्र
र्थसमकादिसमासव्यवस्थितोऽन्तरपदार्थभूतनयनान्वयानुरोधान्न योऽदेत्तत्क्रमपि स्फुटप्ररूपण
रूपणीयाप्रसङ्गगम्यते न चैवहतथानिगीर्णावत् त्वत्प्रणगते किमपि वैपत्यपर्यसंयुतीति श्लोके
से तत्कुन्तादिवत्राप्रस्तुतासाधारणाहृतान्तत्प्युपात्तोऽस्ति नापि श्लिष्टसाधारणादिविशेषणसमर्पि
तयोः प्रस्तुताप्रस्तुतहृन्तान्तयोरप्रस्तुतहृन्तान्तस्य विद्युन्नयनवन्नाधान्यमस्ति येन तत्स्वरोपान्त
मेतत्तवैपत्यकृदित्यत्रेवपयोऽदृश्यत्रेवचात्रक्रमपि प्रस्तुते प्रस्तुतरूपसमारोपणमभ्युपगम्येमतत्साहिशे
षणसमर्पिताप्रस्तुतव्यवहारसमारोपमात्रमिहवाताहेतः यद्यपि प्रस्तुताप्रस्तुतहृन्तान्तयोरिह
श्लिष्टसाधारणविशेषणसमर्पितयोर्भिन्नपदोपात्तविशेषणेष्विव विशेष्येष्वसमानतादृन्वयाद
स्ति समसप्राधान्यं तथाप्यप्रस्तुतहृन्तान्तान्वयानुरोधान्न प्रस्तुते प्रस्तुतरूपसमारोपोऽङ्गीकर्तव्यः त
था हि यथाप्रस्तुतविशेष्येनास्यप्रस्तुतहृन्तान्तस्यान्वययोग्यता तथैवाप्रस्तुतेऽपि ज्ञानादैनास्ति प्र
कृतहृन्तान्तस्यान्वययोग्यता एवं च समसप्राधान्ययोः प्रकृतहृन्तान्तयोरन्यतरस्यान्यत्र रूपमारोपेऽभ्युगन्तव्ये १८

28

प्रक्रमा ३

अलकचेष्टालेखलेखावलिखेंखड्गे उल्लेखोऽभिगं इस्युगतं प्रस्वेदिरक्कोद्भूतं ग्राम्यहृत्तकप्रहारमधि।
कस्मात्समासोदेतत्पार्थक्यात्केइ क्रमादंस्तु भगन्या संस्पन्नेनेन कृतौ अत्र केउ कहन्तिनेव अर्पमाने व्यावला
न्कुञ्चभावमित्यादि क्रियाविशेषणाभ्यां विपरीतरतसमकालिकावृत्तान्तः प्रतीयते एवं च विशेष·
णानि श्लिष्टानि सद्यः साधारणानीति भेदः सारूप्यादपि समासोक्तिर्दृश्यते यथा पुरा यत्र स्रोतः पु
लिनमधुना तत्र सरितां विपर्यासं यातो घनविरलभावः क्षितिरुहां बहोर्दृष्टं कालादपरमिव मन्ये वन
मिदं निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति अत्र वनवर्णने प्रस्तुते तत्सारूप्यात्कुटुम्बेश्वरधनसन्ता
नादिसमृद्ध्यसमृद्धिविपर्यासभाजस्तत्तत्समाश्रयस्य ग्रामनगरादेर्वृत्तान्तः प्रतीयते अत्र च विशेषण।
साम्यात्सारूप्याद्वा पदप्रस्तुतवृत्तान्तस्य प्रत्यायनं तत्प्रकृते विशेषणतत्समारोपार्थं सर्वथैव प्रस्तुतानन्व
यिनः कस्यचिदंशस्याभावाद्वायोगात् ततश्च समासोक्तावप्रस्तुतव्यवहारसमारोपश्चारुताहेतुः न तु रूप
कवदप्रस्तुतेऽप्रस्तुतरूपसमारोपोऽप्यस्ति मुखं चन्द्र इत्यत्र मुखे चन्द्रत्वारोपे हि तत्र द्योतकचन्द्रशब्दसम
भिव्याहारवदलङ्कृतं भवति चन्द्रमा इत्यादिसमासोक्त्युदाहरणे चन्द्रादेर्नायकत्वारोपे हेतोस्तद्वाचकपद
समभिव्याहाराभावात् निरीक्ष्य विद्युन्नयनैः पयोदो मुखं निशायामभिसारिकायाः धारानिपातैः स

रूपेणैव गम्यमानातेन रूपेणात्र समारोपस्थितेरत्यन्ताविनैव ।

कु. ६. यं समासोक्तावप्रस्तुतवृत्तान्तस्य शाब्दार्थस्याप्रस्तुतवृत्तान्तस्यैव युक्तमिति युक्तमेव प्राचीनानां ल
५९ क्षणमिति विभावनीयं अलंकारः परिकरः साभिप्राये विशेषणे सुधांशुकलितोत्तंसस्तापं हरतु
वः शिवः अत्र सुधांशुकलितोत्तंसत्वविशेषणं तापहरणसामर्थ्याभिप्रायं यथा वा तव प्रसा
दात्कुसुमायुधोपि सहायमेकं मधुमेव लब्ध्वा कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनो कु.४
न्ये अत्र पिनाकपाणेरिति हरविशेषणं कुसुमायुधस्य स्वधैर्यलम्भासमर्थविशेषणं च सारार्धैर्यता २।५
भिप्रायगर्भं यथा वा सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः शरीरकस्यापि कृते मूढाः पापानि
कुर्वते अत्र शरीरविशेषणानि तस्य हेयत्वेनानादरणीयत्वाभिप्रायगर्भाणि यथा वा कास्थ्येनैकत
या स्थितं स्तुतिगणं जन्मीनवल्मीकृतोनाभोनाभवमत्यन्तसम्महत्वाच्छ्वनाभाषिषं विज्ञायावहल्क
रू.५ थामवकथं तत्र मित्रानासैर्दैवतवनुगौसंहंकतैकं यशाकुयां अत्र स्तुतिगणे तव्यास्यमित्यादीनि वि
घ३ शेषणानि तस्मिन्यासांधारणकार्यकरणप्रतिषेधमुखेन नाहं वासस्त्वाद्यभिप्रायगर्भाणि ना
नायोदाहरणयोरेकैकं विशेषणं सममनेनयोर्दाहरणयोः प्रत्येकं बहूनि विशेषणानि तत्रापि प्रथ
मोदाहरणे सर्वाणि विशेषणान्येकाभिप्रायगर्भाणि [illegible] चद्वितीयोदाहरणे भिन्नाभि ॥

कं.द.वरण ॥

श्रुतएवप्रस्तुते:प्रस्तुतवृत्तान्तस्यारोपश्चाकृतादेत्रप्रतीतिरुक्तं ननुनैवंसतिविशेषणसाम्यादप्रस्तुत
स्यागम्यत्वेसमासोक्तिः विशेषणानांसाम्येनयत्रप्रस्तुतवर्तिनांअप्रस्तुतस्यागम्यत्वंसासमासोक्ति
रिष्यतइत्यादीतिप्राचीनानांसमासोक्तिलक्षणानिनसंगच्छेरन् प्रस्तुतेश्लिष्टसाधारणादिरूप·
विशेषणसमर्पितानुरागपूर्वकवदनचुम्बनाद्यप्रस्तुतवृत्तान्तसमारोपमात्रस्यचाहृतादेतत्राभ्यु
पगमेनविशेषणसाम्यकृतकामुकाद्यप्रस्तुतधर्मिव्यञ्जनानपेक्षणादितिचेत्उच्यतेस्वरूपतो
प्रस्तुतवृत्तान्तस्यारोपोनचाहृतादेतत: किन्त्वप्रस्तुतकामुकादिसंबन्धित्वेनावगम्यमानस्यतस्यारोपः
तथाभूतस्यैवरस्यानुगुणत्वात् नचतावदवगमनेविशेषणपदानांसामर्थ्यमस्ति अतःश्लेषादिम
हिम्नाविशेषणपदैः स्वरूपतः समर्पितेनवदनचुम्बनादिनातत्संबन्धिनिराजादौसमारोपितेपुनरस्यादौ
[illegible]तदीयत्वात्तथानवदितिविशेषणसाम्येनवाच्योपस्कारकस्याप्रस्तुतव्यञ्जनस्या
स्यापेक्षाअतएवश्लिष्टविशेषणपामिवसाधारणविशेषणानामप्यप्रस्तुतव्यवहारसमारोपस्त्वे
वप्राचीनानांप्रवादः ऊढंकेव्यावल्लाकुचभारत्वादिविशिष्टवनितासेव्यत्वस्यकामुकसंबन्धित्वेनैवस
मारोपणीयत्वात्स्वरूपतः ऊढंकेपितस्यसत्वेनासमारोपणीयत्वात् किंचसारूप्यनिबंधनेनोदाहृता

अ.द. शेषाणां विन्यासस्य विच्छित्तिवशादलंकारत्वे सिद्धेऽन्यत्रापि ग्रथांशुकलितोऽत्र समस्यादौ तस्यामला
२० भेन निवार्यतेऽपि विवेकपदार्थद्वैतकं काव्यलिंगमलंकार इति सर्वसंमतं न द्वैकस्यापि विशेषणं।
स्य साभिप्रायस्यालंकारत्वमुक्तमेव साभिप्राये विशेष्ये तु भवेत्परिकरांकुरः चतुर्णां पुरुषार्थानां
दाता देवश्चतुर्भुजः अत्र चतुर्भुज इति विशेष्यं पुरुषार्थचतुष्टयदानसामर्थ्याभिप्रायगर्भं यथा वा फ
णीन्द्रस्ते गुणान्वक्तुं लिखितुं हैहयाधिपः द्रष्टुमाखण्डलः साक्षात्क वयमेषु के गुणाः फणीन्द्र इत्यादिवि
शेष्यपदानि सहस्रमुखत्वाद्यभिप्रायगर्भाणि नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयाश्रितः सर्वदो
२० माधवः पायात्स यो गंगामदीधरत् अब्जेन त्वन्मुखं तुल्यं हरिणाहितसक्तिना उच्चरद्भूरिकीलालः
शुशुभे वाहिनीपतिः अनेकार्थशब्दविन्यासः श्लेषः स च त्रिविधः प्रकृतानेकविषयः अप्रकृता
नेकविषयश्च सर्वदेत्यादिना क्रमेणोदाहरणानि तत्र सर्वदो माधव इति स्तोतव्यत्वेन प्रकृतयोर्हरिह
रयोः कीर्तनं प्रकृतश्लेषः अब्जेन कमलमब्जश्चन्द्र इत्यनयोरुपमानमात्रत्वेनाप्रकृतयोः कीर्तनमित्यप्रकृ
तश्लेषः वाहिनीपतिः सेनापतिः समुद्रश्च तत्र समितौ शस्त्रप्रयातोद्यतरुधिरस्य सेनापतेर्वर्णनं
प्रकृतमिति प्रकृताप्रकृतश्लेषः यथा वा जातं काकोदरो येन द्रोणापि करुणात्मना पूतनामारणा २०

ऽभिप्रायगर्भीणि वाक्यार्थरूपाणीति भेदः । तेषु चैकार्थसद्भावेपि न क्षतिर्व्यपदेशः । नापहरणो मन्त्र
न२ स्यस्यैकेऽप्यन्याये सर्वथा निषेधभंजकत्वे शरीररक्तणार्थपापमाचरतां भूहत्वे स्वस्य वर्णनीयराजगुण
कथनाशक्तत्वे च वाच्यपर्यायप्रकारकत्वादनपरक्तं यथा र्थस्य वाच्यपरिकरत्वात्परिकर इति नामास्या
लंकारस्य केचित्तु निष्प्रयोजनविशेषणोपादाने अपुष्टार्थदोषस्योक्तत्वात्सप्रयोजनत्वं विशेषणस्य
दोषाभावमात्रं न कश्चिदलंकारः एकनिष्ठतादृशानेकविशेषणोपन्यासः परं वैचित्र्यविशेषात्परिकर वै५
इत्यलंकारमध्ये परिगणितस्तथाह्यः वक्तृत्वेनानेकविशेषणोपन्यासः परिकर इति नतिप्रमः
श्लेषयमकादिवत्पुष्टार्थत्वदोषाभावे नानेकस्यापि विशेषणस्य साभिप्रायस्य विन्यासे विच्छित्तिविशे
षसद्भावात्परिकरत्वोपपत्तेः यथा अतिपजेतानि जांपादिदेवता मुभयतः स्वयं वर्तेत्वषनेप्ययं तितिभ्य
नैवं सदेवतकावयं वनवतानवता किमहि इह अत्र पुरुहूतर्जेोयुक्तान्नदादीन्प्रति भगवतः कृ
ष्णस्य वाक्ये गोवर्द्धनगिरिरेवास्माकं रक्तकत्वेन दैवतमिति स एव पूजनीयः नारत्नकः पुरहूत इत्यं
वपरं वनवतेति गोवर्द्धनगिरेर्विशेषणं काननवत्तानिर्झरादिमत्त्वाद्यपुष्पफलतृणजलादिभिरार
णपकानामस्माकं अस्मद्गवां च गवामयमेव रक्षकस्त्वभिप्रायगर्भं एवमनेकस्यापि साभिप्रायवि

का॰द॰ मिरजंसिषेविरेदोषमोषधिपतेरसत्रियो अत्रसमासोक्त्युदाहरणयोः प्राकरणिकेर्थे प्रकरणवशात्क
२१ टितिबुद्धिस्थे विशेषणसाम्यादप्रकृतोपिवृत्तवेश्यावृत्तांतादिः प्रतीयते तत्रसमासोक्तेरंगंश्लेषइति स॰
वेषामभिमतएव एवमन्यत्रापि श्लेषहेतुकेध्वनिबुद्धिर्नकार्या यथारम्याइतिप्राप्तवतीः पताकारागंति
विक्ताइतिवर्द्धयंतीः यस्यामसेवंतनमद्वलीकासमंवधूभिर्बलभीर्युवानः अत्रद्वितीयांतादिविशेष
णसमर्पितार्थांतराणांनशब्दसामर्थ्यान्नवधूभिरन्वयः वि भक्तिभेदात् नचविभक्तिभेदेपितद्वत्वया
त्तेएकंसाधर्म्यमिहनिबद्धमस्तियतः एतस्मिन्नधिकपयः श्रियंवहंत्यः संतोभ्रएवनभ्रवाजवेतनी
21 ताः वाल्मीकेररहितरामलक्ष्मणानांसाधर्म्यंदधतिगिरामहासरस्यः इत्यत्रेवातिमश्लेषोभवेत्
समभिव्येक्रियाविशेषणांसहार्थत्वेनाप्युपपन्नेवधूशब्दविशेषणार्थान्वयात् प्राग्भागप्रतीते
साम्यार्थनालंबते तस्मादर्थसौंदर्यबलादेवतदन्वयात्संधानमितिगूढश्लेषः तदत्रतत्त्वादेवसम
शब्दस्यसाधर्म्यार्थत्वकल्पनेइतिवाच्यस्येवोपमालंकारस्यांगमयंश्लेषइत्यलमतिप्रपंचेन तस्मिद्व
श्लेषद्वैविध्ये एवंश्लेषः प्रकारांतरेणापिद्विविधःसंपन्नः उदाहरणंगजेषुअत्रकीलालवादिनीत्यादि ॥
शब्देषुपरस्परंविलक्षणंपदभंगमनपेक्ष्यनानार्थकोडीकारभंगश्लेषः सर्वदोमाधवोयोगंगा हरिणाद्रि
क्षप

स्यातः स्वैरश्रयोक्तेषु नीतानामाकुलीभावं लुब्धैर्भूरिशिलीमुखैः सदृशे वनवृद्धानां कमला-
नां त्वदीक्षणे अस्मन्नुदयमारूढं कांतिमान् रक्तमंडलः राजा हरति लोकस्य हृदयं मृदुभिः करैः अ-
त्राद्ये स्तोतव्यत्वेन प्रकृतयो राजकमलयोः श्लेषः द्वितीये उपमानत्वेनाप्रकृतयोः पद्महरिणयोः श्लेषः तृ-
तीये त्रिवर्णनप्रस्तावे प्रकृतस्य प्रत्यग्रोदितचंद्रस्याप्रकृतस्य नवाभिषिक्तनृपतेश्च श्लेषः पदत्र प्र-
कृताप्रकृतश्लेषोदाहरणे शब्दशक्तिमूलध्वनिमिच्छंति प्राचस्तन्न प्रकृताप्रकृताभिधानमूलकस्य-
उपमादेरलंकारस्य व्यंग्यत्वाभिप्रायेण तत्र प्रकृतार्थस्यैव व्यंग्यत्वाभिप्राये अप्रकृतार्थस्यापिधानात्प्र-
तिपाद्यस्याभिधेयत्वावश्यंभावेन व्यञ्जनानपेक्षत्वात् यद्यपि प्रकृतार्थे प्रकरणबलात् स्फुरतीति बुद्धि-
स्यैसत्त्वेऽपश्चान्नृपतित्रासयत्नादिवाचिनां राजकरादिपदानां अन्योन्यसन्निधानबलान्न विषयशा-
न्तरे नत्रोन्मेष एवं कमप्रकृतार्थः स्फुरेत् नैतावता तस्य व्यंग्यत्वं शास्त्रप्रतिपाद्यमाने सर्वत्रैव व्यञ्जना-
नपेक्षणात् पर्यवसिते प्रकृतार्थाभिधाने स्फुरति चेत् कामं स्फुटश्लेषो भवतु अस्ति चान्यत्रापि गूढ।
श्लेषः यथा अयमतिजरठाः प्रकामगुर्वीरलघुविलंबिपयोधरोपरुद्धाः सततमसुमतामगम्यरू-
पाः परिणतदिक्करिकास्तटीर्विभर्ति मेहमस्मिमण्डर्पमोपलादर्शितस्वपपुत्राभवन्नमः दृष्टयस्ति-

अ. र.
२१

त्स्वरूपे कृत्रिमवेषव्यवहारमात्रेण विद्वत्तामभिनयन्तीत्येवंपर्यवस्यति । यथा वा । अंतश्छिद्राणि भू
यांसि कंटकानां बहवो बहिः कथं कमलनालस्य मा भूवन्भंगुरा गुणाः । अत्र कमलनालवृत्तांतकीर्तनं
तत्स्वरूपे बहिः खलेषु जाग्रत्स्वभ्रातृपुत्रादिभिर्वृतः कलहं कुर्वाणेषु गृहस्थेषु पर्यवस्यति । एवं च लक्षणे ।
येः प्रसंगात्स्तुतिनिंदास्वरूपाभ्यामसाधारणकीर्तनपरोऽप्रस्तुतः सामान्यनिबंधना यथा वि
धाय वैरं सामर्षे नरोरौ य उदासते प्रक्षिप्योदर्चिषं कक्षे शेरते तेभिमारुतं । अत्र प्रागेव सामर्षे शिशुपा-
ले किमपीड्यमानादिना वैरं दृढीकृतवता क्रमेण न तस्मिन्नुदासितमयुक्तमिति वक्तव्येऽर्थे प्रस्तुतेन त
त्प्रत्यायनार्थं सामान्यमभिहितं यथा वा मोहार्दस्वर्णरेखाणामस्त्रद्धा वचभिदाजन्मघोपरोन्नमिति को
प्यस्मि परोत्तालिकघोपलः । अत्रापदिष्टं प्रस्तुतश्चपरोपि ममहितमाचरसि तदानमुन्नमसहृदिति
विशेषे वक्तव्ये प्रस्तुते सामान्यमभिहितं विशेषनिबंधना यथा । अकार्यवरोपितस्मृगश्चंद्रमा
मृगलांछनः । केसरीनिष्ठुरक्षिप्तमृगयूथो मृगाधिपः । अत्र कृष्णं प्रति बलभद्रवाक्ये मार्दवदूषणप
रे एवं प्रस्तावात्रसारेणाहंकारपदव्यातिभाग्भवति । ततमृदुरिति सामान्ये वक्तव्ये तत्प्रत्यायनार्थं
मप्रस्तुतो विशेषोऽभिहितः । एवं हृदन्कथादिषु सामान्यतः कांश्चिदर्थं प्रस्तुत्य तद्विवरणार्थमप्रस्तु २१

22

तसक्तिनेत्यादिश्च विलक्षणं पदं ... त्यना ... कोशीकारान्तभंगाश्लेष इतितत्र सभंगश्लेषः शब्दा
लंकारः अभंगश्लेषस्त्वर्थालंकार इति केचित् उभयमपि शब्दालंकार इत्यन्ये उभयमप्यर्थालंका
र इति स्वाभिप्रायः एतद्विवेचनं तु चित्रमीमांसायां द्रष्टव्यं अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुताश्रया
एकः कृती शकुन्तेषु योन्यं शक्रान्न याचते यत्राप्रस्तुतवृत्तान्तवर्णनेन प्रस्तुतावगतिपर्यवसायितदप्र
स्तुतप्रशंसालंकारः अप्रस्तुतवृत्तान्तवर्णनेन प्रस्तुतावगतिश्चाप्रस्तुतात्प्रस्तुतसंबंधे सति भवति सं
बंधश्च सारूप्यसामान्यविशेषभावः कार्यकारणभावो वा संभवति तत्र सामान्यविशेषस्य विशेषा।
त्सामान्यावगतौ द्वैविध्यं कार्यकारणभावेपि कार्यात्कारणस्य कारणाद्वा कार्यस्यावगतौ द्वैविध्यं
सारूप्ये त्वेकोभेद इत्यस्याः पंचप्रकाराः यदाहुः कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति तदन्य
स्य वचस्तुल्ये तुल्यस्येति च पंचधेति तत्र सारूप्यनिबंधनाप्रस्तुतप्रशंसोदाहरणं एकः कृतीति।
अत्राप्रस्तुतस्य चातकस्य प्रशंसा प्रशंसनीयत्वेन प्रस्तुते तत्सरूपे त्वदेकोपाचनान्निवृत्ते मानिनि
पर्यवस्यति यथा वा आबद्धकृत्रिमसटाजटिलांसभित्तिरारोपितो मृगपतेः पदवीं यदि श्वा मत्ते॰
भकुंभतटपाटनलंपटस्य नादं करिष्यति कथं हरिणाधिपस्य अत्र श्वानकस्य निंदनीयत्वेन प्रस्तुतेन॰ इति

कृ० द०
२३

